S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



'f. behind' पश्चादेत्य, पृष्ठतः, पृष्ठत आगत्य; f. hence' अतः, इतः; 'f. afar' दूरतः, दूरात्; 'f. without' बाहिर्देशात्; 'f. within' अभ्यंतरात्, अंतःप्रदेशात्.

**Front,** *s.* अग्रं, अग्रभागः-देशः, मुखं, मूर्धन् *m.*; 'f. door or gate' मुखं, निःसरणं. **2** वदनं, आस्यं, मुखं, आननं. **3** शिरस् *n.*, ललाटं; 'in f. of.' पुरः, पुरतः, अग्रे, अग्रतः, पुरस्तात्, प्रत्यक्षं, समक्षं, साक्षात्, अभि-सं-मुखं-खे, (with gen.); 'f. of war' रणधुरा, रणशिरस् *n.*, मूर्धन् *m.n.*, 'f. of army' सेनामुखं, सेनाग्रं, अग्रानीकं (f. ranks); 'in the f.' अग्रे, मूर्ध्नि, धुरि, शिरसि; 'to place in the f.' पुरस्कृ, अग्रणीकृ, अग्रेसरीकृ. **-***v.* संमुखं-खे स्था 1 P or वृत् 1 A, संमुखी-अभिमुखी-भू; oft. by मुख or अभिमुख in comp.; 'a house f. ing the east' प्राङ्मुखं-प्राच्यभिमुखं-गृहं. **-age,** *s.* अग्र-पूर्व-भागः, मुखं. **-al,** *a.* लालाटिक (की *f.*), ललाट in comp. **-***s.* ललाटपट्टं; 'f. of an elephant' कुंभः, गंडः. **-less,** *a.* धृष्ट, निर्लज्ज, निष्त्रप. **-let,** *s.* ललाटपट्टं.

**Frontier,** *s.* सीमा-मन् *f.*, उपांत, पर्यंतः, प्रांतः, समंतः, सामंतः-तं. **-***a.* 'Dwelling on the f.' सामंत (ती *f.*), सीमावर्तिन्, पर्यंतस्थ, प्रांतनिवासिन्; *See* **Border.**

**Frontispiece,** *s.* मुखप्रतिमा-चित्रं; 'f. of a house' गृहमुखं, गृहाग्रभागः.

**Frost,** *s.* तुषारः, तुहिनं, हिमं, अवश्यायः, नीहारः, प्रालेयं, मिहिका; 'f.-bitten' हिमासिक्त, तुषार-शीत-उपहत. **-y,** *a.* हिम, तुषार, हिम-तुषार-वत्.

**Froth,** *s.* फेनः-णः, मंडः-डं, उत्सेचनं; *See* **Ferment.** **-***v. i.* फेनायते-मंडायते (D.), उत्सिच् pass. **-y,** *a.* फेनिल, फेनमय (यी *f.*), फेनिन्. **2** असार, लघु, निःसार, निःसत्व, अंतःशून्य.

**Frouzy,** *a.* पूतिगंधि, उग्रगंध.

**Froward,** *a.* अदम्य, अविनेय, अतिलालित, दुर्ललित, उच्छृंखल, दुर्दांत. **2** प्रतीप, प्रतिकूल, वक्रस्वभाव, विलोम, वामशील, प्रतीपाचार. **-ly,** *adv* वक्रभावेन, प्रतिकूलं. **-ness,** *s.* प्रतीपता, वामता, वक्रभावः, अदम्यता.

**Frown,** *s.* भ्रूभंगः, भ्रू(भ्रु)कुटि-टी *f.*, भ्रूभेदः-क्षेपः-संकोचः. **-***v. i.* भ्रूकुटिं बंध् 9 P or रच् 10 or कृ 8 U, भ्रूभंगेन दृश् 1 P, भ्रुवौ संकुच् 1 P; 'Oh he just f. s at myself' अये मय्येव भ्रूकुटीधरः संवृत्तः (U. 5). **-ing,** *a.* नत-आकुंचित-भ्रू, सभ्रूभंग. **-ingly,** *adv.* सभ्रूभंगं, भ्रूक्षेपेण, भ्रूकुटिं बद्ध्वा, सभ्रूक्षेपं.

**Fructify,** *v. t.* बहुफलदीकृ 8 U, सफलीकृ, स्फीतीकृ, सफलयति (D.). **-Fructuous, -Fructiferous,** *a.* (बहु) फलद, फलिन्, फलदायिन्.

**Frugal,** *a.* मित-अल्प-व्यय-व्ययिन्, स्वल्प-परिमित-व्यय, अमुक्तहस्त, कृपण, व्ययविमुख. **-ity,** *s.* मितव्ययिता, मित-स्वल्प-व्ययः, अमुक्तहस्तत्वं, कृपणत्वं. **-ly,** *adv.* अमुक्तहस्तं; मित-स्वल्प-व्ययेन, अल्पव्ययपूर्वं, कृपणं.

**Fruit,** *s.* फलं (lit. and fig.); श(स)स्यं, प्रसवः, उत्पन्नं. **2** परिणामः, उत्तरफलं, कर्मफलं. **3** (Progeny) अपत्यं, संतानः-नं, संतति *f.*, प्रजा, प्रसूति *f.*; फलं. **4** अर्थः, लाभः, फलागमः, फलप्राप्ति *f.*, 'dry f.' वानं; 'unripe f.' शलाटु; 'bear f.' फल् 1 P, फलं बंध् 9 P or दा 3 U, सफलीभू, पच् pass., (सद्य एव सुकृतां हि पच्यते कांक्षितं R. xI. 50) 'f.-bearer' फलदातृ *m.*, फलदः; 'f.-bearing' फलद, फलेग्रहि, फलभृत्, फलदायिन्, फलिन्, फलशालिन्; 'f.-garden' फलवाटः-टिका; 'f.-season or time' फलकालः-समयः, फलावचयकालः; 'f.-stalk or stem' शस्यमंजरी, प्रसवबंधनं, वृंतं; 'f.-tree' फलदः वृक्षः or वनस्पतिः, फलग्राहिन् *m.* **-age,** *s.* फलोच्चयः, फलभारः-गुच्छः, फलागमः. **-erer,** *s.* फलविक्रयिन् *m.* **-ery,** *s.* फलानि (pl.). **2** फलस्थानं. **-ful,** *a.* फलवत्, फलद, फलिन्, सफल, फलित, अवंध्य, अमोघ, बहुफलद, फलिन, फलेग्रहि. **2** बहुप्रज, प्रजनिष्णु, बह्वपत्य, बहुप्रजोपेत. **3** उत्पादक, जनक; आवह-प्रभवः-मूलं-कारणं in comp. **-less,** *a.* निष्फल, वि-अ-फल, निरर्थक, व्यर्थ, मोघ, वंध्य, अनर्थक, निष्प्रयोजन, निर्गुण, अनुपयुक्त, फलहीन, अवकेशिन्. **-lessly,** *adv.* व्यर्थं, निरर्थकं, मुधा, वृथा, मोघं, निष्फलं. **-lessness,** *s.* वैयर्थ्यं, अनुपयोगः, व्यर्थता, वैफल्यं. **-Fruition,** *s.* उप-,भोगः, भुक्ति *f.*, अनुभवः, आस्वादः; सुखोपभोगः, फलास्वादः, सुखानुभवः, सुखास्वादः.

**Frumentaceous,** *a.* गोधूममय (यी *f.*)

**Frump,** *s.* कर्कशा, कैकेयी

**Frustrate,** *v. t.* विफली-निष्फली-मोघी-कृ 8 U, प्रति-व्या-हन् 2 P, भंज् 7 P, खंड् 10, वृथा-मुधा-कृ; *See* **Baffle.** **-***a.* **Fruitless,** q. v. **-ed,** *a.* प्रति-व्या-हत, मोघीकृत, वृथाभूत; 'f. in attempts or hopes' भग्नोद्यम, व्यर्थप्रयत्न, भग्नसंकल्प; भग्नाश, अकृतार्थ, मोघाश, खंडिताश, प्रतिहत, प्रतिबद्ध. **-ion,** *s.* भंगः, व्याघातः, विफलीकरणं, खंडनं. **-ive, -ory,** *a.* व्याघातिन्, भंजक, वृथाकारिन्.

**Frutescent,** *a.* गुल्मावृत.

**Fry,** *s.* क्षुद्रमत्स्यसंघः, मत्स्यसंघातः, पोताधानं. **2** मीनांडं. **-***v. t.* भ्रस्ज् 6 P or c. (भर्जयति), पच् 1 P, भृज्ज् 1 A. **-ing,** *s.* भर्जनं, पचनं; 'f.-pan' पिठरः-रं, भृज्जनं, भ्राष्ट्रः, भर्जनपात्रं, अंबरीषं; ऋजीषं, पिष्टपचनं; (for liquor) स्वेदनी, कंदु-दू *m.-f.* **-ed,** *a.* भ्रष्ट, भर्जित, कंदुपक्व; 'f. grain' धानाः (*f.*, pl.), भ्रष्टयवाः, लाजाः (*m.* pl.).

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007